# द्वितीयोऽध्यायः

## (क) श्रीमद्भागवतस्य शास्त्रीयं वैशिष्ट्यम्

श्रीमद्भागवतं वेदरूपिणः कल्पवृक्षस्य परमानन्दप्रदं रसमयं मधुरं फलमस्ति । यद् मर्त्यलोकनिवासिनां दुःखक्लेशसन्तप्तजीवानां कल्याणार्थं परमहंसशिरोमणितत्त्वज्ञानिनः श्रीमतः श्रीशुकदेवमुनेः मुखात् निर्गत्य अस्यां धरायामागतं वर्तते ।

श्रीमद्भागवतं हि सम्प्रति सर्वेषां पुराणानां श्रेष्ठतमं पुराणमिति निष्प्रचम् । महर्षिणा व्यासेन सप्तदशमहापुराण–महाभारत–ब्रह्मसूत्रादीनां प्रणयनानन्तरमपि यदा स्वमनसि सन्तोषो नैव लब्धः तदा देवर्षेर्नारदस्योपदेशेन भगवद्गुणविषयकप्रधानग्रन्थं द्वादशस्कन्धसमन्वितं सर्वोपनिषद्सारं श्रीमद्भागवतं निर्माय परमाशान्तिर्लब्धा ।

श्रीमद्भागवते सर्वेषां शास्त्राणां सारतत्त्वं सन्निविष्टम् । श्रीमद्भागवतस्य माहात्म्ये अस्य ग्रन्थस्य महिमा उद्धृता –

वेदोपनिषदां साराज्जाता भागवती कथा ।
अत्युत्तमा ततो भाति पृथग्भूता फलाकृतिः ॥[१]

इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
भक्तिज्ञानविरागाणां स्थापनाय प्रकाशितम् ॥[२]

श्रीमद्भागवते न केवलं काव्य–भक्ति – दर्शनतत्त्वानां निरूपणं वर्तते अपितु वेदोपवेद–सृष्टिविद्या, पौराणिकतत्त्व– धर्मशास्त्र–नीतिशास्त्र, सांख्यदर्शन–

---

[1] श्रीमद्भागवते माहात्म्यम् २/६७

[2] श्रीमद्भागवते माहात्म्यम् २/७१

अष्टाङ्गयोगवर्णन– मीमांसा– न्यायशास्त्र– राजनीतिशास्त्र– वैशेषिकदर्शन– व्याकरणशास्त्र – ज्योतिषशास्त्रादीनां सन्दर्भाः अत्र परिलक्षितास्सन्ति ।

किन्नाम शास्त्रम्? शास्त्रशब्दस्य निष्पत्तिः शासु अनुशिष्टौ धातोरजायत । शास्त्रविषये "शास्त्रपरिचयः"इत्यस्मिन् ग्रन्थे शास्त्रशब्दस्य विशद्व्याख्या उद्धृता । यथा –

"प्रथमेहि किन्नाम शास्त्रम् ? । कति विधञ्च तत् ? का उपयोगिता तेषां चेति सर्वं ध्यातव्यमिति तत्रोच्यते "शिष्यते अनेन" इति व्युत्पत्या शासु अनुशिष्टौ धातोः ष्ट्रन प्रत्ययान्तेन शास् धातुना शास्त्रशब्दस्य साधुत्वम्, अपिच शास्ति च त्रायते च तच्छास्त्रम् । संस्कृतस्यानेकैराचार्यैः विषयेऽस्मिन् निर्दिष्टम् –

यच्चानुकूलमेतस्य तच्च शास्त्रं प्रकीर्तितम् ।
अतोऽन्यो ग्रन्थविस्तारो नैव शास्त्रं कुवर्त्म तत् ॥[१]

स्कान्दे–

ऋग्यजुः सामाथर्वा च भारतं पञ्चरात्रकम् ।
मूलरामायणं चैव शास्त्रमित्यभिधीयते ॥

अपि च शास्त्रविषये इदमपि प्रसिद्धं वर्तते –

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।
पुंसा येनोदीर्यतेऽत्र तच्छास्त्रमभिधीयते ॥ (भामती)

अपि च –

कार्यबोधे यथा चेष्टा लिङ्गहर्षादयस्तथा ।
सिद्धबोधेऽर्थवच्चैवं शास्त्रत्वं हितशासनात् ॥

---

[1] मध्वभाष्य १/१/३

अनेन ज्ञायते तत् ज्ञानविशेषाधवकत्वरूपविशेषधर्मावच्छित्वेन्नत्वेन सर्वथा समुपपन्नं भवति । तच्च शास्त्रं द्विविधम्– अपौरुषेयं पौरुषेयञ्च ।

न पुरुषेण प्रणितं यत् तदपौरुषेयम् ।

यच्च पुरुषेण प्रणीतं तत् पौरुषेयमिति ॥

अपौरुषेयशास्त्रे वेदाः – पौरुषेयशास्त्रे च उपवेदाः"[1] शास्त्रशब्दे "आयनेयीनीयियः फढखछघां प्रत्यादीनाम्" इति सूत्रेण छस्य स्थाने ईय् आदेशः कृते सति शास्त्रीयशब्दनिष्पन्नो जातः, यस्यार्थः वेदविहितः शास्त्रानुमोदितश्च वर्तते श्रीमद्भागवते यत्र शास्त्रीयं वैशिष्ट्यं लभ्यमानं विषयमत्र प्रस्तौमि ।

श्रीमद्भागवते वेदोपवेदविषयकसन्दर्भाः

भागवते वेदविषयकसन्दर्भाः समासव्यासरूपेण समुपलभ्यते । याजुष्वेदमन्त्राणां सङ्केतः साक्षाद्रूपेण क्वचिच्च साङ्केतिकरूपेण लभ्यते । वेदोपवेदा नियमान्विता यमास्तर्केतिहासाङ्गपुराणसंहिताः ।

ये चापरे योगसमीरदीपित–ज्ञानाग्निना रन्धितकर्मकल्मषाः ।

ववन्दिरे यत्स्मरणानुभावतः स्वायम्भुवं धाम गता अकर्मकम् ॥[2]

दशमस्कन्धस्य पञ्चचत्वारिंशतमेऽध्यायेऽपि यदा कृष्णवलरामौ पठनार्थं महर्षिसान्दिपनेः आश्रमे गतवन्तौ । तत्र गुरोः सेवारतौ आस्ताम् । महर्षिसान्दिपनी अतीवप्रसन्नं भूत्वा द्वाभ्यां भ्रातृभ्यां षडङ्गानां उपनिषदसंहितां वेदानां शिक्षां प्राददत । ऋषिच्छन्दःमन्त्रदेवतानां ज्ञानेन सह धनुर्वेद–मनुस्मृति–धर्मशास्त्र–मीमांसादीनां तथा वेदानां तात्पर्यं यदस्ति तद् अवबोधयन्ति स्म । तैः तर्कविद्या

---

[1] शास्त्रपरिचयः पृष्ठ. १६–१७

[2] श्रीमद्भागवते ८/२१/२

(न्यायशास्त्रं) इत्यादीनामपि अशिक्षयत । एभिस्सह सन्धि–विग्रह–यान–आसन्–द्वैधाश्रयाश्च एषां षड्भेदयुक्तानां राजनीतेः अपि अध्यापयति ।

तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः ।
प्रोवाच वेदानखिलान् साङ्गोपनिषदो गुरुः ॥
सरहस्यं धनुर्वेदं धर्मान् न्यायपथांस्तथा ।
तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधाम् ॥[१]

श्रीमद्भागवते नैकेषु स्थलेषु वेदमन्त्राणां साक्षाद्रूपेण सङ्केतरूपेण वा सम्प्राप्यते । अन्यत्र श्लोकेषु मन्त्रार्थसादृश्यमपि परिलक्ष्यते । शुक्लयजुर्वेदे पुरुषसूक्तं वर्तते तत्सूक्तस्य एकादशो मन्त्रः –

ब्राह्मणोस्य मुखमासीद्बाहु राजन्यः कृतः ।
ऊरूतदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत ।[२]

मन्त्रस्यास्य सदृशभावार्थमपि भागवते दरीदृश्यते –

ब्रह्माननं क्षत्रभुजो महात्मा
विड्रुरङ्घ्रिश्रितकृष्णवर्णः ।
नानाभिधाभीज्य–गणोपपन्नो
द्रव्यात्मकः कर्म वितानयोगः ॥[३]

अन्येपि श्लोकाः विद्यन्ते येषु वेदमन्त्राणां प्रभावः परिलक्ष्यते – अनेनोदाहरणेन ज्ञायते यत् श्रीमद्भागवतमहापुराणं वेदानां सारमस्ति ।

---

[1] श्रीमद्भागवते १०/४५/३३–३४
[2] शुक्लयजुर्वेदे ३१/११
[3] श्रीमद्भागवते २/१/३७

चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत ।

श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥[१]

अस्य मन्त्रस्य सम्पूर्णार्थं भागवते एव समुपलभ्यते –

अव्यक्तमाहुर्हृदयं मनश्च स चन्द्रमाः सर्वविकारकोशः ॥[२]

शुक्लयजुर्वेदे –

नाभ्याऽसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्त्तत ।

पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथा लोकांरऽअकल्पयन् ॥[३]

अस्य मन्त्रस्य प्रभावः परिलक्ष्यते –

नभस्तलं नाभिसरो गृणन्ति ।[४]

ऋग्वेदस्यापि अनेकमन्त्राः ये श्रीमद्भागवते प्राप्यन्ते तत् साम्यभावेन सन्दृश्यन्ते । प्रथमकाण्डस्य चतुःपञ्चाशताधिकशततमस्य सूक्तस्य प्रथममन्त्रे परिलक्ष्यते –

विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममं रजांसि ॥[५]

अस्य मन्त्रस्य भावार्थमपि भागवते दृश्यते –

य पार्थिवान्यपि कविर्विममं रजांसि ।

विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह यः ॥[६]

पुरुरवोर्वशीसम्बादे तु बहूनि उदाहरणानि दृष्टव्यानि । ऋग्वेदस्य दशममण्डलस्य पञ्चनवतितमे सूक्ते –

---

1 शुक्लयजुर्वेदे ३१/१२
2 श्रीमद्भागवते २/१/३४
3 शुक्लयजुर्वेदे ३१/१३
4 श्रीमद्भागवते २/१/२७
5 ऋग्वेदे १/१५४/१
6 श्रीमद्भागवते २/७/४०

"हये जाये मनसा तिष्ठ घोरे"[1]

अस्य मन्त्रस्य प्रभावः भागवते पूर्णतया संगच्छते । यथा –

अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि ।[2]

धर्मशास्त्रस्यापि सन्दर्भाः ग्रन्थे क्वचित् क्वचित् सम्प्राप्यते । मनुस्मृतिकारेण आत्मविद्याविषयकचर्चायां नवमेऽध्याये त्रिविद्यादण्डनीति–विषयकवर्णनं क्रियते–

त्रैविद्येभ्यस्त्रयीं विद्याद् दण्डनीतिं च शाश्वतीम् ।

आन्वीक्षिकीं चात्मविद्या वातोरम्भां च लोकतः ॥[3]

मनुस्मृतिकारेण मनुस्मृत्यां यदुक्तं तदेव भागवते सम्प्राप्तम् –

सरहस्यं धनुर्वेदं धर्मान् न्यायपथांस्तथा ।

तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधाम् ॥[4]

श्रीमद्भागवतं न केवलं तत्त्वज्ञानस्य प्रतीकात्मकं वर्तते, अपितु केन्द्रस्थानं विद्यते । भारतीयमनीषयः "उपनिषदः" तत्त्वज्ञानस्य निधिरूपत्वेन स्वीक्रियते । अनेन सिद्धयति यत् श्रीमद्भागवतं तत्त्वज्ञानदृष्ट्या सर्वोपनिषदां सारसर्वस्वभूतमेव दृश्यते । वेदान्तविषयकतथ्यानां ब्रह्मविद्यामायाज्ञानोपहितचैतन्यविषयकं सर्वतत्त्वनिरूपणमपि पौनः पुण्येन विभिन्नस्थलेषु वर्णनं सम्प्राप्यते ।

[1] ऋग्वेदे १०/९५

[2] श्रीमद्भागवते ९/१४/३४

[3] मनुस्मृति ९/४३

[4] श्रीमद्भागवते १०/४५/३४

श्रीमद्भागवते वेदान्तविषयकवर्णनम् –

अहमेवासमेवाग्रे नान्यद् यत् सदसत् परम् ।

पश्चादहं यदेतच्च योऽवशिष्येत् सोऽस्म्यहम् ॥[1]

मायानिरूपणम् –

ऋतेर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि ।

तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः ॥[2]

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः ।

अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा ॥[3]

श्रीमद्भागवते यत्रोपनिषदां चर्चा विहिता तेन प्रतीयते यत् उत्तरमीमांसायां ज्ञानं असंदग्धरूपेण तत्रोच्यते । श्रीमद्भागवते अन्वयव्यतिरेकाभ्यां ब्रह्मसिद्धिः क्रियते । तद्यथा ब्रह्मेदं नास्ति ब्रह्मेदं नास्ति अनेन प्रकारेण व्यतिरेकपद्धत्या तथा ब्रह्मेदमस्ति, ब्रह्मेदमस्ति इयमन्वयपद्धत्या इदमेव सिद्धं भवति यत् किञ्चिद् दृश्यमानजगद् वर्तते तत्र सर्वातीतसर्वस्वरूपञ्च सर्वदा सार्वत्रिकरूपेण भगवान्नेव विद्यते । तदेवास्ति वस्तुतत्त्वमस्ति । ये ज्ञानविजिगीषवः तेभ्यः अस्य अवबोधस्यावश्यकता वर्तते ।

श्रीमद्भागवमहापुराणं पूर्णतया अद्वैतवादी ग्रन्थः वर्तते । षष्ठे स्कन्धे अद्वैतविषयकवर्णनं प्रचुरमात्रेण संदृश्यते –

स एव हि पुनः सर्ववस्तुनि वस्तुस्वरूपः

---

1 श्रीमद्भागवते २/९/३२

2 श्रीमद्भागवते २/९/३३

3 श्रीमद्भागवते २/९/३५

सर्वेश्वरः सकलजगत्कारणकारणभूतः

सर्वप्रत्यगात्मत्वात् सर्वगुणाभासोपलक्षित

एक एव पर्यवशेषितः ॥[१]

पुनर्विचारे कृते स एव भगवान्नेव सर्ववस्तुनि सर्वप्रपञ्चवस्तुस्वरूपः परमार्थभूतः सर्वेश्वरः सकलजगतो यानि कारणानि महदादीनि तेषामपि कारणभूतः सर्वेषां जीवानां प्रत्यगात्मत्वादन्तर्यामित्वादित्यर्थः । सर्वेषां गुणानां गुणकार्यत्वेन जडानां बुद्धीन्द्रियादीनामाभासैः प्रकाशैरुपलक्षितः । अन्यथा जडपदार्थेन विना जीवस्य न प्रकाश इति । अतः सर्वलयाधिष्ठानतया नेति नेति इत्यादिभिः एको भवानेव पर्यवशेषित इति ।[२]

श्रीमद्भागवते षडङ्गानां सन्दर्भाः

पाणिनीयशिक्षायां वेदानां षडङ्गानां वर्णनं समुपलभ्यते –

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।

ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ॥

शिक्षाघ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम् ।

तस्मात् साङ्गमधीत्यैव ब्रह्मलोकं महीयते ॥[३]

छन्दःतः व्याकरणपर्यन्तं षड्शास्त्राणां विषयसम्बन्धीनां सन्दर्भाः भागवते व्याससमासरूपेण परिभाषते । सम्पूर्णभागवते तु अनेकानि छन्दांसि प्रयुक्तानि

---

[1] श्रीमद्भागवते ६/९/३८

[2] अनेकटीकासमलङ्कृतम् श्रीमद्भागवतमहापुराणम् पृ. ३१०

[3] पाणिनीयशिक्षा ४१–४२

महर्षिणा । किन्तु साक्षात् छन्दसां नाम अपि लब्धम् । नारायणकवचे श्लोकमाध्यमेन गायत्री छन्दः प्रयुक्तं जातम् –

सविसर्गं फडन्तं तत्सर्वदिक्षु विनिर्दिशेत् ।

ओं विष्णवे नम इति ।[१]

एकादशस्कन्धे एकादशछन्दसां नामानि निर्दिष्टानि सन्ति –

गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ।

त्रिष्टुब्जगत्यतिच्छन्दो ह्यत्यष्ट्यतिजगद् विराट् ॥[२]

श्रीमद्भागवतं एव एतादृशो ग्रन्थोऽस्ति यस्मिन् अनेकविधछन्दसां प्रयोगं जातम् । विविधाभिः स्तुतिभिः छन्दसां दिव्यता प्रकाश्यते ।

"हस्तौ कल्पोऽथ पठ्यते" इति पाणिनिनोक्तं वेदाध्ययनस्य बोधनाय कल्पाध्ययनं आवश्यकमिति । अनेन कारणेन श्रीमद्भागवते कल्पविषयकसन्दर्भाः अपि समुपलभ्यते । कल्पस्याविर्भावः वेदेषु विस्तीर्णं कर्मकाण्डं सूत्रबद्धं कर्तुमेव भूतम् । वेदेषु यद्विहितानां कर्मणां व्यवस्थारूपेण संदर्शनाय इदं शास्त्रं कल्पशास्त्ररूपेण प्रसिद्ध्यति । विष्णुमित्रेणोक्तं यत् –

कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम् ।

श्रौतधर्मगृह्यशुल्वसूत्राणि चतुर्विधानि कल्पसूत्राणि निर्दिष्टानि सन्ति । श्रौतसूत्रेषु वेदोक्तानां दर्शपौर्णमासादियज्ञानां विधानं समुपलभ्यते । एषु ब्राह्मणग्रन्थवर्णितानां दर्शपौर्णमासाग्निहोत्रादिश्रौताग्नियज्ञानां क्रमबद्धेन विवेचनं सम्प्राप्यते । धर्मसूत्रेषु लौकिकालौकिक – सामाजिक – धार्मिक– नैतिकक्रियाणां

---

[1] श्रीमद्भागवते ६/८/१०

[2] श्रीमद्भागवते ११/२१/४१

सुष्ठुरूपेण प्रतिपादनं कृतमिति । धार्मिकनियमाः प्रजानां राज्ञाञ्च कर्तव्यानां वर्णनमस्ति । गृह्यसूत्रेषु षोडशसंस्काराणां सविस्तरं वर्णनं त्रैवर्णिकैरवश्यानुष्ठेयानाम् अनुष्ठानानां यागविशेषाणां वर्णनं विद्यते । शुल्वसूत्रेषु वेदीनिर्माणप्रकारः एव प्राधान्योऽस्ति ।

एतेषां विषयाणां लघुसंकेतरूपेण भागवते चर्चा विद्यते । एकादशस्कन्धे –उद्धवप्रसङ्गे चर्चेयं प्राप्ता जाता । उद्धवकृष्णसंवादे उद्धवेन कृष्णं प्रति प्रश्नं पृच्छति कृष्णः सर्वेषां प्रश्नानां निराकरणं करोति स्म । उद्धवेन क्रियायोगविषयकप्रश्नः पृष्टः –

क्रियायोगं समाचक्ष्व भवदाराधनं प्रभो ।
यस्मात्त्वां ये यथार्चन्ति सात्वताः सात्वतर्षभ ॥[1]

हे भक्तवत्सल ! श्रीकृष्ण ! यत् क्रियायोगस्य आश्रयं नीत्वा ये भक्तजनाः येन प्रकारेण यदुद्देशेन भवतां अभ्यर्चना, अर्चना, पूजा क्रियन्ते । भवन्तः स्वाराधनक्रियायोगस्य वर्णनं कुर्युः ।

भगवता कृष्णेन सर्वेषां प्रश्नानां समाधानं कृतम् । क्रियायोगवर्णनं कर्मकाण्ड – सन्ध्यावन्दन – नित्यकर्म – मूर्तिपूजा – अष्टमूर्ति–इत्यादिविषयाणां वर्णनं कृतम् । वेदीनिर्माणविषयकवर्णनं हवनविधिः धर्मश्रौतगृह्यशुल्वसूत्राणां सम्पूर्णसारं संगृह्य यागादिप्रसङ्गे निष्पीड्य सर्वस्मै प्रदत्तम् । कल्पशास्त्रस्य वर्णनमत्र संकेतमात्रेण संनिर्दिश्यते –

विधिना विहिते कुण्डे मेखलागर्तवेदिभिः ।
अग्निमाधाय परितः समूहेत् पाणिनोदितम् ॥

[1] श्रीमद्भागवते ११/२७/१

परिस्तीर्याथ पर्युक्षेदन्वाधाय यथाविधि ।

प्रोक्षण्याऽऽसाद्य द्रव्याणि प्रोक्ष्याग्नौ भावयेत माम् ॥[1]

हवनविधिविषये कथयति – शास्त्रोक्तविधिना निर्मितकुण्डे अग्निस्थापनां कुर्यात् । स कुण्डः मेखलया गर्तया वेद्या च शोभायमानः भवेत् । हस्तवायुना अग्निं प्रज्वाल्य एकत्रितं कुर्यात् । वेदीं परितः कुशान् परिस्तरणं कृत्वा कुशकण्डिकां कारयेत्, मन्त्रैः जलेन अभिषिञ्चेच्च । सर्वासां सामग्रीणां सकलीकृत्य भगवन्तं कृष्णं ध्यायेत् ।

मदर्चां सम्प्रतिष्ठाप्य मन्दिरं कारयेद् दृढम् ।

पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितान् ॥

पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहम् ।

क्षेत्रापणपुरग्रामान् दत्त्वा मत्सार्ष्टितामियात् ॥

प्रतिष्ठया सर्वभौमं सद्मना भुवनत्रयम् ।

पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥[2]

अनेन प्रकारेण श्रीमद्भागवते कल्पशास्त्रस्य वर्णनं समुपलब्धं जातम् ।

श्रीमद्भागवते ज्योतिषविषयकसन्दर्भाः

शास्त्राणां मध्ये ज्योतिषशास्त्रस्यापि विशिष्टमहत्त्वं दरीदृश्यते । कल्पशास्त्रस्य परिपूरकमिदं शास्त्रम् । पाणिनीयशिक्षायां यथोक्तं यत् "ज्योतिषामयनं चक्षुः" श्रीमद्भागवते भगवतः कृष्णस्य नामकरणप्रसङ्गे ज्योतिषशास्त्रमयनरूपेण इति नन्दबाबामहाभागेन निगदितम् –

---

[1] श्रीमद्भागवते ११/२७/३६–३७

[2] श्रीमद्भागवते ११/२७/५०–५२

ज्योतिषामयनं साक्षाद् यत्तज्ज्ञानमतीन्द्रियम् ।

प्रणीतं भवता येन पुमान् वेद परावरम् ॥[१]

नन्दबाबा गर्गाचार्यं प्रति कथितवान् । यज्ज्ञानं इन्द्रियेभ्यः अगोचरमस्ति । भूतभविष्ययोः निहितं वर्तते तत्सर्वं ज्योतिषशास्त्रेण प्रत्यक्षीकर्तुं शक्यते । तज्ज्योतिषशास्त्रस्य रचना भवता एव हि कृता ।

ज्योतिषशास्त्रस्य ज्ञानं विना अहोरात्र–पक्ष–मास–ऋतु–संवत्सराणां शुभत्वाशुभत्वज्ञानमपि न सम्भवितुमर्हति । किं बहुन्नोक्तम् अस्यावश्यकता यज्ञसम्पादनाय यात्रादिसम्पादनाय भवत्येव ।

श्रीमद्भागवते ज्योतिषस्य सर्वाणि तत्त्वानि विविधस्थले वर्णितानि सन्ति । दशमस्कन्धस्य अष्टमेऽध्याये ज्योतिषं नयनं इति वर्णितम् । ज्योतिषशास्त्रे प्रधानरूपेण सूर्यचन्द्रयोः महत्त्वं विद्यते । अनेन कारणेन चान्द्रसंवत्सरं सौरसंवत्सरमपि प्रसिद्धमस्ति । श्रीमद्भागवते सूर्यचन्द्रविषये द्वादशस्कन्धे द्वितीयेऽध्याये वर्णनं प्राप्यते यत् –

यदा चन्द्रश्च सूर्यश्च तथा तिष्यबृहस्पती ।

एकराशौ समेष्यन्ति तदा भवति तत् कृतम् ॥[२]

अस्मिन् श्लोके अमावस्यायाः चर्चा विहिता । ततः परं तथैव खगोलविषयकी चर्चा सप्तर्षीणां च वर्णनं महर्षिव्यासेन कृतम् । तत्र पञ्चविंशति श्लोकतः द्वात्रिंशत् श्लोकपर्यन्तं नक्षत्रैः कालस्य परिवर्तनं भवति सापि चर्चा अत्र वर्णितास्ति ।

येऽतीता वर्तमाना ये भविष्यन्ति च पार्थिवाः ।

---

[1] श्रीमद्भागवते १०/८/५

[2] श्रीमद्भागवते १२/२/२४

ते त उद्देशतः प्रोक्ता वंशीयाः सोमसूर्ययोः ॥
आरभ्य भवतो जन्म यावन्नन्दाभिषेचनम् ।
एतद् वर्षसहस्रं तु शतं पञ्चदशोत्तरं ॥
सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि ।
तयोस्तु मध्ये नक्षत्रं दृश्यते यत् समं निशि ॥
तेनैत ऋषयो युक्तास्तिष्ठन्त्यब्दशतं नृणाम् ।
ते त्वदीये द्विजाः काले अधुना चाश्रिता मघाः ॥
विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं गतः ।
तदाविशत् कलिर्लोकं पापे यद् रमते जनः ॥
यावत् स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः ।
तावत् कलिर्वै पृथिवीं पराक्रान्तुं न चाशकृत् ॥
तदा देवर्षयः सप्त मघासु विचरन्ति हि ।
तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः ॥
यदा मघाभ्यो यास्यन्ति पूर्वाषाढां महर्षयः ।
तदा नन्दात् प्रभृत्येष कलिर्वृद्धिं गमिष्यति ॥[१]

खगोलशास्त्रविषये महर्षिणा भागवतस्य पञ्चमस्कन्धे बृहद्वर्णनं कृतम् । पञ्चमस्कन्धस्य एकविंशेऽध्याये सूर्यस्य गतिविषयकवर्णनं जातम् । यदा सूर्यः मेषतुलयोः गमनं क्रियते तदा अहोरात्रं भवति । तथैव सूर्यः वृषभराशितः कन्याराशिपर्यन्तं राशिषु भ्रमणं करोति । तदा प्रतिमासं प्रतिरात्रौ एका घटिका न्यूना भवति । अत्र अहोरात्रस्य विपर्ययवर्णनं परिवर्तनञ्च कथ्यते –

[1] श्रीमद्भागवते १२/२/२५–३२

यदा वृश्चिकादिषु पञ्चसु वर्तते

तदाहोरात्राणि विपर्ययाणि भवन्ति ॥[१]

सूर्यस्य उदयास्तविषयेऽपि गणना प्राप्यते । अस्मिन्नेव अध्याये सूर्यचक्रस्य ज्योतिषचक्रस्य च विविधनक्षत्रैः सह परिभ्रमणं वर्णनमुपलभ्यते

एवं ततो वारुणीं सौम्यमैन्द्रीं च

पुनस्तथान्ये च ग्रहाः सोमादयो नक्षत्रैः

सह ज्योतिश्चक्रे समभ्युद्यन्ति सह वा निम्लोचन्ति ।

एवं मुहूर्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि

सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्तते पुरीषु ॥[२]

द्वाविंशेऽध्याये राज्ञा परीक्षितेन प्रश्नः कृतः यत्र भगवतः सूर्यस्य गतिसमये मेरुं ध्रुवं च प्रदक्षिणया कथं दक्षिणावर्तं भवति ? । इत्यस्य उत्तरति शुकदेवः- तत्र कुलालचक्रस्य उदाहरणेन ग्रहाणां गतिः कालभेदश्च राशिनक्षत्रानुसारेण वर्णयति –

यथा कुलालचक्रेण भ्रमता सह

भ्रमतां तदाश्रयाणां पिपीलिकादीनां

गतिरन्यैव प्रदेशान्तरेष्वप्युपलभ्य-

मानत्वादेवं नक्षत्रराशिभिरुपलक्षितेन

कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणेन

परिधावता सह परिधावमानानां

तदाश्रयाणां सूर्यादीनां ग्रहाणां

---

[1] श्रीमद्भागवते ५/२१/५

[2] श्रीमद्भागवते ५/२१/११-१२

गतिरन्यैव नक्षत्रान्तरे राश्यन्तरे

चोपलभ्यमानत्वात् ॥

स एष भगवानादिपुरुष एव साक्षान्नारायणो

लोकानां स्वस्तय आत्मानं त्रयीमयं

कर्मविशुद्धिनिमित्तं कविभिरपि

च वेदेन विजिज्ञास्यमानो द्वादशधा

विभज्य षट्सु वसन्तादिष्वृतुषु

यथोपजोषमृतुगुणान् विदधाति ॥[१]

संसारे कालविषयकं यज्ज्ञानं प्रसिद्धं वर्तते तस्य शास्त्रीयं ज्योतिषीयं महत्त्वं वर्णयति महर्षिभिः । यथा – तत्र संवत्सराणां अवयवानि चन्द्रस्य कारणेन शुक्लपक्षस्य विभागः वर्णितोऽस्ति ।

अग्रे ऋतुवर्णनं वर्षवर्णनं सूर्यादिग्रहाणां वर्णनं सूर्यतः शनिपर्यन्तं वर्णनमपि अस्मिन्नध्याये उपलभ्यते । चतुर्विंशाऽध्याये सिंहिकापुत्रा असुराधर्मस्य राहोः वर्णनमपि श्रीमद्भागवते विस्तरेण उपलभ्यते –

ग्रहर्क्षतारामयमाधिदैविकं

पापापहं मन्त्रकृतां त्रिकालं

नमस्यतः स्मरतो वा त्रिकालं

नश्येत तत्काजमाशु पापम् ॥[२]

अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रव–

[1] श्रीमद्भागवते ५/२२/२–३

[2] श्रीमद्भागवते ५/२३/९

–च्चरतीत्येके योऽसावमरत्वं ग्रहत्त्वं चालभत ।

भगवदनुकम्पया स्वयमसुरापसदः सैंहिकेयो

ह्यतदर्हस्तस्य तात जन्मकर्माणि चोपरिष्टाद्वक्ष्यामः ॥[१]

एवंप्रकारेण सम्प्रतिकाले ज्योतिषस्य ये त्रयः विभागाः संहिता, गणितं, होरा च प्रसिद्धाः सन्ति तेषां समेषां सन्दर्भाः श्रीमद्भागवते सम्प्राप्ताः सन्ति ।

श्रीमद्भागवते निरुक्तविषयकसन्दर्भाः

निरुक्तविषये सायणाचार्यः ऋग्वेदभाष्यभूमिकायामाह –

अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम् ।[२]

निरुक्तमाध्यमेन वैदिकशब्दानां निर्वचनं क्रियते । निरुक्तस्य ये वर्ण्यविषयाः सन्ति तेषां विषयाणां वर्णनं स्वल्परूपेण प्राप्यते । शिक्षा, कल्पव्याकरणनिरुक्तप्रभृतिभिः शास्त्राणां अनेके सन्दर्भाः महर्षिव्यासः व्यनक्ति । निरुक्तशास्त्रस्य प्रसिद्धप्राचीनाचार्याणामपि नामोल्लेखः प्राप्यते । द्वादशस्कन्धस्य षष्ठेऽध्याये निर्दिष्टं यत् –

पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैमहात्मभिः ।

वेदाश्च कथिता व्यस्ता एतत्सौम्याभिधेहि नः ॥[३]

अनेन श्लोकेन वेदविहितव्याकरणस्य निरुक्तविषयस्य च चर्चा कृता पुराणकारेण ।

यदरोदीः सुरश्रेष्ठ सोद्वेग इव बालकः ।

---

[1] श्रीमद्भागवते ५/२४/१

[2] ऋग्वेदे सायणभाष्यभूमिकायाम्

[3] श्रीमद्भागवते १२/६/३६

ततस्त्वामभिधास्यन्ति नाम्ना रुद्र इति प्रजाः ॥[1]

अनेकेषु स्थलषेु दशमस्कन्धे च महर्षिगर्गेण भगवान्नाम निरुक्तिः वर्णिता। अन्ये च विविधाः सन्दर्भाः प्राप्यन्ते निरुक्तविषयकाः ।

श्रीमद्भागवते शिक्षाविषयकसन्दर्भाः

शिक्षा ज्ञानं विना वेदमन्त्राणां शुद्धोच्चारणं न सम्भवितुमर्हति । येन शास्त्रेण वेदमन्त्राणां शुद्धोच्चारणे सारल्यं साहाय्यं च भवति तच्छास्त्रं शिक्षेति कथ्यते । अर्थात् स्वरवर्णादीनाम् उच्चारणं नियमबोधयित्री विद्या शिक्ष्येत्यभिधीयते । वेदेषु सर्वत्र स्वरप्राधान्यं भवत्येव स्वरभेदेन अर्थभेदसम्भवात् । इदं स्वरज्ञानं शिक्षाधीनं भवति । यतः अशुद्धोच्चारणेन महानन्र्थः भवति । यथोक्तं महाभाष्यकारेण –

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।

स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रोः स्वरतोपराधात् ॥[2]

अनेन प्रमाणेन शिक्षायाः महती आवश्यकता शुद्धोच्चारणार्थं भवति । श्रीमद्भागवतस्यैकादशस्कन्धस्य एकविंशाऽध्याये शिक्षाविषयकसन्दर्भाः समुपलब्धाः सन्ति ।

मयोपबृंहितं भूम्ना ब्रह्मणानन्तशक्तिना ।

भूतेषु घोषरूपेण बिसेषूर्णेव लक्ष्यते ॥

यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात् ।

आकाशाद्घोषवान् प्राणो मनसा स्पर्शरूपिणा ॥

---

[1] श्रीमद्भागवते ३/१२/१०

[2] महाभाष्यम् पृष्ठ. ७–८

छन्दोमयोऽमृतमयः सहस्रपदवीं प्रभुः ।

ओंकाराद् व्यञ्जितस्पर्शस्वरोष्मान्तःस्थभूषिताम् ॥[१]

एतेषु श्लोकेषु शिक्षायां प्रातिशाख्येषु च वर्णितवर्णानां घोष–अघोष–महाप्राण–अल्पप्राणश्चेति नामानि कीर्तितानि ।

श्रीमद्भागवते व्याकरणशास्त्रसन्दर्भाः

भागवतस्य एकादशस्कन्धस्य एकविंशाऽध्याये द्वादशेऽध्याये षष्ठेऽध्याये च व्याकरणशास्त्रस्य विषयाणां सूत्ररूपेण वर्णनमुपलभ्यते । तत्र स्फोटवादस्य समाम्नायस्य च सन्दर्भाः प्राप्यन्ते ।

शब्दब्रह्म सुदुर्बोधं प्राणेन्द्रियमनोमयम् ।

अनन्तपारं गम्भीरं दुर्विगाह्यं समुद्रवत् ॥[२]

यल्लिखितं मया पूर्वम्–

ऋग्यजुः सामार्थवा च भारतं पञ्चरात्रकम् ।

मूलरामायणं चैव शास्त्रमित्यभिधीयते ॥[३]

इति स्कन्दपुराणाधारेण रामायणं महाभारतमपि शास्त्रत्वेन अभिधीयते । अत एव रामायणस्य सारगर्भिता चर्चा श्रीमद्भागवतस्य नवमस्कन्धस्य दशमाध्यायतः एकादशाध्यायपर्यन्तं वर्णिता । एतदतिरिक्तं महाभारतस्य चर्चा भागवते प्रथमस्कन्धस्य सप्तमाध्यायतः द्वादशाध्यायपर्यन्तं वर्णनमस्ति ।

---

1 श्रीमद्भागवते ११/२१/३७–३९

2 श्रीमद्भागवते ११/२१/३६

3 स्कन्दपुराणम्

संस्कृतवाङ्मये यथा षडाङ्गानि वेदानां तथैव षड्दर्शनान्यपि शास्त्राणां अभिन्नाङ्गानि सन्ति । यतोहि धर्मार्थकाममोक्षप्राप्तये यदावश्यकज्ञानं तत्त्वञ्च तत्तत्त्वानां वर्णनं सन्दर्भाश्च श्रीमद्भागवते समारोहेण वर्णनमनेकेषु स्थलेषु प्राप्यते । अत्रोपस्थापितानि दर्शनानि क्रमेण लिखितानि सन्ति ।

श्रीमद्भागवते सांख्यदर्शनसन्दर्भाः

सम् उपसर्गपूर्वकं ख्या प्रकथने धातोः अङ्प्रत्ययं कृते सति टाप् प्रत्ययं भूत्वा संख्या शब्दस्य निष्पत्तिर्भवति । संख्याशब्देन "तस्येदं" सूत्रस्य सहाय्येन तद्धिते अण्प्रत्ययं कृत्वा सांख्यशब्दः निष्पन्नो जातः । यस्य शाब्दिकमर्थं वर्तते – गणनया सम्बन्धितः अथवा गणनया ज्ञातुं योग्यमिति । एतदतिरिक्तमपि सम् उपसर्गपूर्वकं चक्षिङ् धातोः सांख्यशब्दस्य सिद्धिः भवति ।

अस्य दर्शनस्य प्रमुखानि पञ्चविंशतितत्त्वानि विहितानि सन्ति । श्रीमद्भागवते सांख्यदर्शनस्य सन्दर्भाः विस्तरेण समुपलभ्यते । भागवतस्य प्रथमस्कन्धस्य तृतीयेऽध्याये दशमे श्लोके भगवता कपिलेन वर्णितः । अनेन महर्षिकपिलेन सांख्यतत्त्वानां समुपलब्धिः निर्दिष्टा –

पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् ।
प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम् ॥[१]

अपिच द्वितीयस्कन्धस्य पञ्चमेऽध्याये –

सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः ।
स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥[२]

---

1 श्रीमद्भागवते १/३/१०

2 श्रीमद्भागवते २/५/१८

श्रीमद्भागवते प्रकृतिं जडचेतनागोचरमायाजगत्कर्त्रीगुण सर्गकर्त्री–प्रसवधर्मिणी इत्यादिनामभिः सम्बोध्यते । प्रकृतेः अव्यक्तस्य अप्रधानस्य च रूपेण वर्णयन् तस्याः स्वरूपमपि प्रस्तुतं कृतम् –

यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् ।
प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ॥[1]

श्रीमद्भागवते योगदर्शनसन्दर्भाः

युजिर् योगे धातोः भावे इति घञ् प्रत्यये कृते सति योगः शब्दो निष्पन्नो जातः । यस्यार्थः योजनम् वर्तते । अमरकोशकारेण "योगः संनहनोपायध्यान – संगतियुक्तिषु"[2] मेदिनीकोशकारमतमिदं वर्तते –

योगोऽपूर्वार्थसम्प्राप्तौ संगतिध्यानयुक्तिषु ।
वपुःस्थैर्यप्रयोगे च विष्कम्भादिषु भेषजे ॥
द्रव्योपायसंनहनेष्वपि कार्मणेऽपि च ॥[3]

इत्यादिषु अर्थेष्वपि योगशब्दस्य प्रयोगः सन्दृश्यते ।

सांख्यदर्शने ये सिद्धान्ताः वर्णिताः सन्ति तेषां प्रयोगाः एव योगदर्शने दरीदृश्यते । योगदर्शनं सांख्यदर्शनेन प्रतिपादितान् सिद्धान्तान् क्रियायां परिणमयति । तत्तु तथा यतते येन सांख्यस्य यो विचारो वर्तते स एव योगस्यापि विद्यते । मानवस्य मानसं यावत् विकारान्वितं भवति तावत् सः तत्त्वज्ञानसमवाप्तिपात्रं न भवति । आत्मज्ञानलाभाय हृदयस्य पवित्रता बुद्धेः

---

[1] श्रीमद्भागवते ३/२६/१०
[2] अमरकोशे ३/३/२२
[3] मेदिनीकोशे २३/१८–१९

सात्त्विकगुणशीलिता च अतीव उपयोगी भवति । निर्विकारत्वादिहेतोः योगदर्शनम् अष्टसाधनानि निदधाति ।

श्रीमद्भागवते अष्टाङ्गयोगस्य निरूपणमस्ति सांख्यदर्शनवत् अस्यापि अनेकेषु स्थलेषु सम्प्राप्यते । यथा–भक्तिस्वरूपचित्रणं च भागवते समुपलभ्यते तथैव योगस्यापि सन्दर्भाः उपलभ्यन्ते । किन्तु योगवर्णने प्रकारद्वयं दृश्यते –

१. यत्र कुत्रापि व्यक्तिविशेषस्य तपश्चर्या सन्दर्भेषु ।

२. द्वितीये – योगसाधनायाः क्रियारूपेण च । अनेकानि आख्यानोपाख्यानानि च प्रत्यक्षाप्रत्यक्षरूपेण यौगिगक्रियाणां स्वरूपमपि उपलभ्यते ।

श्रीमद्भागवते न्यायवैशेषिकसन्दर्भाः

संस्कृतवाङ्मये आन्वीक्षिकीदण्डनीतिवार्ता प्रभृतादीनामपि प्रत्यक्षाप्रत्यक्षरूपेण अनेकेषु स्थलेषु न्यूनाधिकवैशद्येन च व्यावर्णितः । साम्प्रतकैः विज्ञानकैः अपि न्यायाधिभौतिकाध्यात्मकान्यपि तत्त्वानि आलोडितानि । तत्सर्वे सन्दर्भाः व्यासमहर्षिणा स्वसमाधिजन्यमहिम्ना प्रत्यक्षदृष्टानि ।

भागवतस्य तृतीयस्कन्धस्य एकादशतमेऽध्याये कालविभागवर्णनसमये परमाण्वादिपदार्थानां द्वयणिकत्रिस्त्रण्यादीनां चर्चा प्रथमश्लोकतः षड्श्लोकपर्यन्तं कृता । पृथिव्यादीनां वर्णनं कृतं ततः परं परमाण्वादीनां तत्त्वानां महत्त्वं वैशिष्ट्यं च निर्दिष्टम् । यथा –

चरमः सद्विशेषाणामनेकोऽसंयुतः सदा ।

परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥[१]

अस्मिन् जगति मानवाः भ्रमवशाद् समुदायरूपस्य परमाणोः एकस्यैव प्रतीतिः कुर्वन्ति । अयं परमाणुः पृथिव्यादिकार्येषु कारणमिति । अत्र महर्षिणा न्यायवैशेषिकसिद्धान्ताः सङ्केतिताः –

एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम ।

संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः ॥[२]

अणुर्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृतः ।

जालार्करश्म्यवगतः खमेवानुपतन्नगात् ॥[३]

एतान् परमाण्वादीन् जगतः सृष्टिकारणं नैयायिकैः स्वीक्रियते । अनेन ज्ञायते यत् श्रीमद्भागवते प्रायेण सर्वशास्त्राणां न्यूनाधिकरूपेण विषयाः समुपदिष्टाः । क्वचित् तात्त्विकरूपेण क्वचिच्च साधनोपयोगिरूपेण महर्षिव्यास शास्त्ररहस्यं मौलिकरूपेण व्यनक्ति । अध्ययनेन अवबुध्यते यच्छास्त्राणां प्रयोजनमस्ति तत्प्रयोजनमनुद्दिश्यैव महर्षिणा विहितमस्ति । तत्र श्रीमद्भागतस्य टीकाकारैः तद्रहस्यमपि स्वस्वटीकायामुद्घाटितं विस्तृतरूपेण । अत एव श्रीमद्भागवते सर्वेषां शास्त्राणां सन्दर्भाः प्राप्यन्ते ।

## (२) श्रीमद्भागवते आध्यात्मिकतत्त्वम्

अष्टादशपुराणेषु कतिपयानि पुराणानि एतादृशानि सन्ति । येषु चतुर्विधपुरुषार्थप्राप्तये विविधानि साधनानि वर्णितानि किन्तु

---

[1] श्रीमद्भागवते ३/११/१

[2] श्रीमद्भागवते ३/११/३

[3] श्रीमद्भागवते ३/११/५

श्रीमद्भागवतमहापुराणमेव एक एतादृशः ग्रन्थः वर्तते यस्मिन् लौकिकपारलौकिकादीनां साधनम् अध्यात्मविषयस्य च प्रधानत्वेन वर्णनमस्ति । किं नाम अध्यात्मम्? श्रीमद्भागवतग्रन्थेन समग्ररूपेणाद्वैततत्त्वस्यैव प्रतिपादनं स्पष्टरूपेण क्रियते इति निष्प्रचम् । भगवदीयावताराणां यत्र साकार–सचित्र–चित्रणं प्राप्यते । तथैव व्यासोक्त–ब्रह्मसूत्रोपनिषदां प्रधानो विषयः य अध्यात्मविषयः वर्तते तस्यापि बृहद्रूपेण वर्णनमत्र प्राप्यते । भगवतः विष्णोः चतुर्विंशत्यवताराणां चर्चात्र वर्तते । भगवतः स्वस्वरूपरहस्योपदेशः ब्रह्मणे एव प्रदत्तः । सृष्टेः पूर्वादहमासीत् ममातिरिक्तं किञ्चिदपि नासीत् स्थूलसूक्ष्मञ्च । तयोः कारणमज्ञानमपि नासीत् । अस्याः सृष्टेः रूपं यत्प्रतीयते तत् सर्वमहमस्मि । किमपि यश्शेषं स्यात् तदप्यहमस्मि –

अहमेवासमेवाग्रे नान्यद् यत् सदसत् परम् ।<br>
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥[१]

चतुःश्लोकी भागवते स्वपरिचयं प्रदाय भगवता स्वमायां परिचयं सम्यक्तया निगद्यते । अस्मिन् जगति अनेकानि वस्तूनि दृष्टिगोचरानि भवन्ति तानि वस्तूनि सत्यवत् प्रतीतानि जातानि । परञ्च सर्वमसत्यमेव । यन्न दृग्गोचरी भवन्ति तत्सत्यम् इति प्रतीयते कार्यमेतत् मायया वर्तते –

ऋतेर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि ।<br>
तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः ॥[२]

ब्रह्मेदं तत्त्वज्ञैः अनेकैः नामभिः सम्बोध्यते । ब्रह्मणः अनेकनामानि सन्ति । यथा – ज्ञानिजनाः ब्रह्मशब्देन व्यपदिशन्ति । योगिजनैः परमात्मेतिशब्देन

[1] श्रीमद्भागवते २/९/३२

[2] श्रीमद्भागवते २/९/३३

सम्बोध्यते । भक्तैः भगवान्शब्देन परिज्ञायते । स्वस्वभावानुसारेण भगवतः स्मरणं वन्दनं अर्चनं सम्बोधनं च क्रियन्ते ।

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।

ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥[१]

यदा ईश्वरः उपाधिभेदेन अनवच्छिन्नं सम्भूय अव्यक्तं भवति तदव्यक्तं निराकारः इति नाम्ना अवगच्छति तदा निर्गुणशब्देन कथयितुं शक्यते । यदा विशुद्धाभ्यान्तरसति बाह्यभेदरहितत्त्वात् परिपूर्णान्तर्मुखीनिर्विकारं च भवति तदा तं भक्तजनैः भगवाद्वासुदेवादिनामभिः अवगम्यते ।

सत्वगुणस्य उपाधेः अवच्छिन्नत्वं निर्गुणब्रह्मैव विष्णुरुद्रब्रह्मपुरुषाः चत्वारि रूपाणि धारयन्ति ।

शुद्धसत्वादवच्छिन्नचैतन्यं विष्णुशब्देन, रजोमिश्रित – सत्वादवच्छिन्नचैतन्यं रुद्रशब्देन, तमोमिश्रितसत्वादवच्छिन्नचैतन्यं ब्रह्माशब्देन, तमोरजोमिश्रितं अवच्छिन्नचैतन्यं पुरुष इति शब्देन व्यवह्रियते । संसारस्य सृष्टिस्थितिसंहारश्च व्यापारे क्रमेण ब्रह्मविष्णुरुद्रश्च त्रयः क्रमशः निमित्तकारणं तथा पुरुषः उपादानकारणं भवति । इमे चत्वारः ब्रह्मणः सगुणरूपं भवन्ति । अत एव भागवतानुसारेण ब्रह्मेति निमित्तोपादानकारणं मन्यते ।

श्रीमद्भागवते ब्रह्मणः स्वरूपम्

ब्रह्म स्वयमेव ज्योतिस्वरूपज्योतिष्मान् भवति । परिपूर्णतमब्रह्म साक्षात् श्रीकृष्णोऽस्ति यः असंख्यानां ब्राह्माण्डानां स्वामी अस्ति । परिपूर्णब्रह्म अनेकान्

[1] श्रीमद्भागवते १/२/११

रूपान् अपि धारणं करोति । परञ्च यां विना किञ्चिदपि कार्यकर्तुम् असहायेति मन्यते सास्ति माया ।

परमात्मा अचिन्त्यशक्तिसमन्वितः सच्चिदानन्दघनस्वरूपः अकारणकरुणा–वरुणालयः चास्ति । स एकस्मिन् काले अनेकेषु स्थलेषु विद्यमानः भवति । भगवतः कृष्णस्य लीलापि अद्भुतास्ति । एकस्मिन् समये देवर्षेः नारदस्य मनसि विचारमागत्य भगवन् कृष्णः स्वग्रहस्थाश्रमे कथं जीवनं निर्वहति अनया दिदृक्षया सह स द्वारकापुरीं संगत्य तत्र दृष्ट्वा एकस्मिन् समये श्रीकृष्णः सर्वाभिः पत्नीभिः सह भिन्नभिन्नकार्येषु प्रवृत्तः आसीत् । दृश्यमिदं दृष्ट्वा नारदस्य मनसि स्थितः भ्रमः नष्टो जातः । इत्थं महिमा भगवतः श्रीकृष्णस्याचिन्त्यशक्तेः अस्ति । जीवः जगच्च ईश्वरस्य रूपद्वयं वर्तते । अयमेव प्रश्नः श्रीमद्भागवते साध्यत्वरूपेण वर्णितोऽस्ति । ब्रह्मप्राप्तिर्ज्ञानं विना नैव भवति तथैव मुक्तिरपि ज्ञानं विना नैव भवति । अयन्तु अकाट्यसिद्धान्तोऽस्ति वेदान्तस्य –

ऋते ज्ञानान्न मुक्तिः ।

अत एव ब्रह्मप्राप्तये ज्ञानस्यावश्यकता वर्तते । ब्रह्मणः स्वरूपद्वयं सगुणं निर्गुणञ्च वर्तते । मायाविशिष्टब्रह्मणः मायोपाहितब्रह्मैव सगुणरूपे प्रसिद्ध्यति जगति । स एव ईश्वरः अयमेव जगतः कर्ता धर्ता हर्ता च अस्ति ।

द्वितीयस्तु सर्वव्यापकः सर्वान्तर्यामि साक्षाच्चैतन्यस्वरूपो निर्गुणश्चेति । स एव प्रकाशानाम् अपि प्रकाशः, तेजसाम् अपि तेजश्च सूर्यचन्द्रतारकादयो न तस्य प्रकाशने प्रभवति । उक्तञ्च –

न तत्र सूर्यो भाति न चन्द्रतारकं

नेमा विद्युतो भान्ति कुतोऽयमग्निः ।

तमेव भान्तमनुभाति सर्वं

तस्य भासा सर्वमिदं विभाति ॥[१]

निर्गुणब्रह्मैव सर्वश्रेष्ठ–सच्चिदानन्दस्वरूप–मायारहित–अखण्ड–इत्यादिभिः नामभिः विज्ञायते । वेदान्तदर्शने ब्रह्म निर्विकल्पं निरुपाधिं निर्विकारं चेति उररीक्रियते । नामरूपादिभेदेन नानादेवतारूपेषु आसादयति । तथा च कठोपनिषदि निगद्यते –

एकस्तथा सर्वभूतान्तरात्मा

रूपं रूपं प्रतिरूपो बहिश्च । [२]

एकं रूपं बहुधा यः करोति ।[३]

तद्ब्रह्म समग्रजीवेषु आत्मारूपणे विराजते ।

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।[४]

बृहदारण्यकोपनिषदि उदाह्रियते ब्रह्मविषये यथा लवणं जले मिश्रितानन्तरं नैव दृश्यते परञ्च लवणन्तु जलस्य प्रत्येकेषु अणुषु विद्यमानमस्ति तथैव ब्रह्म ससारेऽस्मिन् कणे कणे संव्याप्तम् । भगवान् कृष्ण एव परिपूर्णपुरुषोत्तमः ब्रह्म अस्ति ।

स यथा सैन्धवाखिल्य उदके प्रास्त

उदकमेवानि विलियेत् अपरं विधान धन एव ।[५]

---

[1] श्वेता श्वेतरोपनिषद् ६/१४

[2] कठोपनिषदि २/२/९

[3] कठोपनिषदि २/२/१२

[4] श्वेताश्वेतरोपनिषदि ६/११

[5] बृहदारण्यकोपनिषदि

भगवान् कृष्णः स्वयमेव सच्चिदानन्दविग्रहः कर्मयोगी, पूर्णज्ञानी आनन्दस्य प्रतिमूर्तिरेवासीत् । सच्चिदानन्दशब्देन अयमेवार्थः प्रतिपादनं भवति । सद्भावेन कर्मणः, चिद्भावेन ज्ञानस्य, आनन्दभावेन उपासनायाः रसश्च प्रादुर्भावो जातः ।

श्रीकृष्ण एव अचिन्त्यशक्तिसम्पन्नः परमतत्त्वमस्ति । अस्य रूपत्रयं वर्तते –

(१) स्वयंरूपम् ।

(२) भिन्नाभिन्नरूपम्

(३) आवेशरूपञ्च

आद्यरूपम्– पराश्रितं न भवति । अन्येभ्यः अपेक्षाकृतं न भवति स्वयमेव आविर्भूतं जातम् । अस्याः सृष्टेः आदिस्वरूपं कारणानामपि कारणमस्ति ।

द्वितीयरूपम् – भिन्नाभिन्नरूपं रूपेण सह रूपस्य अभिन्नत्वादपि अकृत्या अङ्गेन चारित्रेण तेन भिन्नं वर्तते ।

तृतीयरूपम् – आवेशः केऽपि जीवाः विशिष्टाः सन्ति तेषां हृदये विराजमानः भगवान् विशिष्टरूपेण प्रतिभाति । यथा– वैकुण्ठलोके स्थितः सर्वदा भगवद्सेवारतः शेषः अनवरतरूपेण भगवन्नामपरायणः कीर्तनादिसंलग्नः नारदः तथा सनकादि–ऋषिगणाः इत्यादयः । एतादृशानां जनानां हृदयपटलेषु संतिष्ठ्य तेषां तपस्यात्यागसाधनादिषु प्रेरकः भवति । भगवतः शक्तिः अचिन्त्या गणनातीता अप्रमेया चास्ति । परञ्च भगवतः शक्तीनां संख्या तिस्रः मुख्यत्वेन विद्वद्वर्यैः अभिमन्यते –

१. अन्तरङ्गशक्तिः

२. तटस्थशक्तिः

३. बहिरङ्गशक्तिः

आद्या अन्तरङ्गशक्तिः साक्षात् भगवतः स्वरूपवती भवति ।

द्वितीया तटस्थशक्तिः –

इयं शक्तिः जीवशक्तिरूपेण अवगम्यते । इयमेव जीवस्य आविर्भावस्य कारणं भवति । जीवः अणुः भवति तस्य स्वभावः परिछिन्नः भवति । अन्तरङ्गबहिरङ्गयोः शक्त्योः मध्येस्थित्वात् कारणादेव जीवशक्तिं तटस्थशक्तिः इति कथ्यते ।

तृतीया बहिरङ्गशक्तिः–

शक्तिमिमां मायाशक्तिनाम्ना अपि अवज्ञायते । अस्याः शक्तेः कारणात् जगतः सृष्टिर्भवति । ईश्वरस्य जीवस्य च अनयोः समत्वं जगदपि सत्यभूतपदार्थं अस्ति । यतोहि स सत्यसंकल्पसर्वविद–हरेः बहिरङ्गशक्ते विलासोऽस्ति । अन्तरङ्गशक्तेरपि भेदत्रयं वर्तते । सन्धिनी – संवित् – ह्लादिनी च –

ह्लादिनी सन्धिनी संवित् त्वय्येका सर्वसंस्थितौ ।

ह्लादतापकरी मिश्रा त्वयि नो गुण वर्जिते ॥[1]

सन्धिनीशक्तेः सत्तां धारयति । संवित्शक्तिः अन्यान् सत्तां प्रदानं करोति सर्वेषु बालद्व्येषु व्याप्तं वर्तते । अस्याः शक्तेः ज्ञानेन सम्बद्धशक्तिः इति कथ्यते । अस्याः शक्तेः आश्रयत्वेन स्वस्वरूपं अवगच्छति । ह्लादिनीशक्त्या भगवान् स्वयमेव आनन्दितं भवति अन्यानपि आनन्दस्यानुभवं कारयति ।

[1] विष्णुपुराणे १/१२/६९

अनया दृष्ट्या श्रीकृष्णः स्वयमेव भगवान् अस्ति । श्रीमद्भागवते श्रीकृष्णः श्रीकृष्णे श्रीमद्भागवतम् एव विराजन्ते ।

बाह्याभ्यान्तरभेदराहित्वात् विशुद्ध–परमार्थरूपत्वात् परिपूर्णज्ञानमेव सत्यस्वरूपं सर्वान्तर्यामि सर्वथानिर्विकारः भगवान् इति नाम्ना अवबोद्यते जगत्यस्मिन् । बहून्यपरनामानि वासुदेवेत्यादीनि सन्ति –

ज्ञानं विशुद्धं परमार्थमेकमनन्तरं त्वबहिर्ब्रह्म सत्यम् ।
प्रत्यक् प्रशान्तं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदन्ति ॥[१]

वेदानां तात्पर्यं श्रीकृष्णः, यज्ञानामुद्देश्यं श्रीकृष्णः, सर्वेषां कर्मणां परिसमाप्तिः श्रीकृष्णे एवास्ति । ज्ञानेन ब्रह्मप्राप्तिर्भवति यः श्रीकृष्ण अस्त्येव । तपोऽपि श्रीकृष्णाय, धर्माणामनुष्ठानं श्रीकृष्णाय, सर्वाः गतयः श्रीकृष्णाय भवति । यद्यपि श्रीकृष्णः प्रकृतेः तद्गुणेभ्यः परास्ति तथापि स्वगुणमयीमायया अस्य जगतः सृजनं करोति ।

वासुदेवपरा वेदा वासुदेवपरा मखाः ।
वासुदेवपरा योगा वासुदेपराः क्रियाः ॥
वासुदेवपरं ज्ञानं वासुदेवपरं तपः ।
वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥[२]
स एवेदं ससर्जाग्रे भगवानात्ममायया ।
सदसद्रूपया चासौ गुणमय्यागुणो विभुः ॥[३]

[1] श्रीमद्भागवते ५/१२/११
[2] श्रीमद्भागवते १/२/२८–२९
[3] श्रीमद्भागवते १/२/३०

श्रीमद्भागवतस्य प्रतिपाद्यतत्त्वं परमात्मा स्वयमेवास्ति । परमात्मानम् अनेकनामभिः सम्बोधयन्ति जनाः । कोऽपि ब्रह्मशब्देन कोऽपि परमात्माशब्देन कोऽपि भगवान्शब्देन शब्द्यते । भागवतानुसारेण अस्य प्रश्नस्योत्तरं दातुं नैव शक्यते भगवतः स्वरूपं किम्? । श्रीमद्भागवतं पूर्णग्रन्थरूपेण अवभाषते । ग्रन्थेऽस्मिन् भगवतः विविधानां स्वरूपाणां वर्णनं समुपलभ्यते । निर्विशेषः, सविशेषः निराकारः साकारः च इत्यादिभिः नामभिः भक्तज्ञानिजनाः सम्बोधनं कुर्वन्ति । यः यस्याधिकारी वर्तते स भगवन्तं तद्रूपे एव भागवतपुराणे प्राप्तुं शक्यते । श्रीमद्भागवते विशिष्टवर्णनशैली अस्ति तयानुसारेण यदि विचार्यते तर्हि अन्यानां ग्रन्थानामपेक्षा श्रीमद्भागवतस्यासाधारणविशेषता प्रकटयति ।

श्रीमद्भागवते आश्रयतत्त्वम्

श्रीमद्भागवतस्य प्रतिपाद्यतत्त्वं स्वयमेव परमात्मास्ति । श्रीमद्भागवते दशलक्षणसमन्वितविषयाणां वर्णनं सम्प्राप्यते समग्रभागवतपुराणम् इदमेवाश्रितम् । लक्षणं लक्ष्यीकृत्य भागवतग्रन्थस्य महिमा सर्वेषु पुराणेषु महत्ता, श्रेष्ठतमा, गरीयसी च वर्तते । अस्मिन् ग्रन्थे स्थलद्वये दशलक्षणविषये चर्चा प्राप्ता – द्वितीयस्कन्धे द्वादशस्कन्धे च ।

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥[1]

सर्गः, विसर्गः, स्थानम्, पोषणम्, ऊतयः, मन्वन्तरम्, ईशानुकथा, निरोधः, मुक्तिः, आश्रयः ।

---

[1] श्रीमद्भागवते २/१०/१

समग्रग्रन्थे येषां विषयाणां वर्णनं समुपलभ्यते । दशमस्तु आश्रयः प्रधानत्वरूपेण वर्तते । आश्रयस्य शब्दस्य अर्थः जीवान् आश्रयप्रदातः शरणप्रदातुं योग्यः भगवान् । व्यक्ताव्यक्तयोः, आभासनिरोधयोः, निरपेक्षसाक्षी ब्रह्म । सर्गादेः वर्णनद्वारा भगवतः अनन्तमहिम्नः, ब्रह्मविषयकचिन्तनम्, ब्रह्मस्वरूपावबोधेन अविद्यायाः निवृत्तिः, एतद्दृशानि उद्देश्यानि श्रीमद्भागवतस्यास्ति ।

श्रीमद्भागवतस्य चतुःश्लोकीद्वारा यत्परमतत्त्वस्य वर्णनं क्रियते स आश्रयतत्त्वमेवास्ति तथा अनेकेषु स्थलेषु कारणात्मकं कार्यात्मकं, परमपरं, दृष्टा दृश्यञ्च एषां निषेधं कृत्वा यत्तत्वस्य वर्णनं कृतं तद्ब्रह्मतत्त्वमेव द्वादशस्कन्धेषु चतुःप्रकारप्रलयानां वर्णनमस्ति तदेव आश्रयतत्त्वम् ।

जीवस्य जाग्रतस्वप्न–सुषुप्त्यवस्थानाम् अभिमानीविश्वतेजस –प्राज्ञानां च मायामयरूपेषु यस्य व्यतिरेकान्वयं भवति स संसारदशायाः बाधकस्य च अधिष्ठानब्रह्मेव आश्रयतत्त्वमेव –

आभासश्च निरोधश्च यतश्चाध्यवसीयते ।
स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥
योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः ।
यस्तत्रोभयविच्छेदः पुरुषो ह्याधिभौतिकः ॥
एकमेकतराभावे यदा नोपलभामहे ।
त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥[१]

[1] श्रीमद्भागवते २/१०/७–९

(ग) श्रीमद्भागवते तात्त्विकरहस्यम्

श्रीमद्भागवतं महापुराणं दार्शनिकदृष्ट्या भक्तिकर्मज्ञानदृष्ट्या च महत्त्वपूर्णं विद्यते । जगदाधारस्य परब्रह्मणः ईश्वरस्य तात्त्विकरहस्यादिकं वर्णनमपि प्राप्यते । अत्र श्रीमद्भागवते वर्णनं वर्तते यत् परमेश्वरः जगतः कारणं परब्रह्मस्वरूपमेव उपादानकारणमस्ति निमित्तकारणमपि अस्ति । अयमेव परमेश्वरः सृष्टिस्थितिलयानामाधारः स्वयं प्रकाशः सर्वव्यापकः चेतनः अवाङ्मनसगोचरस्यापि वर्तते । स्वशक्त्याधारेण जगद्विमोहितं करोति । अस्मिन् महापुराणे द्वादशस्कन्धे वर्णितं यत् –

अहं ब्रह्म परं धाम ब्रह्माहं परमं पदम् ।
एवं समीक्षन्नात्मानमात्मन्याधाय निष्कले ॥[१]

अत्र परब्रह्मणः स्वरूपं जीवतत्त्वनिरूपणं ईश्वरतत्त्वनिरूपणं मायाविश्वमोहनी इति निरूपणं च तात्त्विकदृष्ट्या उपलभ्यते । ग्रन्थकारः कथयति श्रीमद्भागवते वर्णिताश्रयतत्त्वमेव ब्रह्म अस्मिन् श्रीकृष्णस्य केवलानन्दानुभवमात्रसंवेद्य ब्रह्मणि एकता निरूपिता वर्तते । ब्रह्मसूत्रस्य ब्रह्म, गीतायाः पुरुषोत्तमः, श्रीमद्भागवतस्य श्रीकृष्णः सर्वे एकैवास्ति ।

यदुक्तम् –

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥[२]

अद्वैतवर्णने श्रीमद्भागवते अद्वैततत्त्वस्य वर्णनं बहुधा परिलक्ष्यते । "एकं सद्विप्रा बहुधा वदन्ति" इति वेदवचनानुसारेण श्रीमद्भागवते अनेकप्रकारैः विद्वद्वर्यैः व्याख्या कृता । वस्तुतः अद्वैततत्त्वं एकमेव ।

---

[1] श्रीमद्भागवते १२/५/११

[2] श्रीमद्भागवते १/२/११

कारणानां कारणम्

यथा पृथिव्यादिकारणतत्त्वैः कार्यस्थावरजङ्गमशरीराणि निर्मीयन्ते तथैव जगति ब्रह्मणः कारणस्वरूपं किन्तु कार्यरूपं विभिन्नरूपाणि उद्भावितानि भवन्ति । अहं सत्वादिगुणत्रयशक्तिभिः सृष्टेः रचना पालनं लयश्च क्रियते ।

अवताराः

श्रीमद्भागवते देवादीनां विविधाः अवताराः वर्णिताः । अयं परमेश्वरः ज्ञानस्वरूपः विशुद्धरूपः सर्वतंत्रस्वरूपः अद्वयानन्दः सर्वव्यापकः निरपेक्षनिर्विकारः साक्षीरूपश्च विद्यते । धर्मोत्थानाय, लोकसंग्रहार्थं लीलार्थं भक्तरक्षार्थं असुराणां विनाशाय पृथिवीं मुक्तिः ददाति । अनेन कारणेन अष्टमस्कन्धे महर्षिणा लिखितं –

न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा ।
तथापि लोकाप्ययसम्भवाय यः स्वमायया तान्यनुकालमृच्छति ॥[१]

एवंप्रकारेण अयं परमप्रभुः, सर्वतन्त्रस्वतन्त्रः मायापतिः जीवाश्रयः, प्राणदातः इन्द्रियागोचरः जगतः परं कारणं, निर्गुणेन सगुणं भवति । सर्वेषु देवेषु विद्यमानाद्वैतरूपं कार्यं कारणरूपं च दृश्यते ।

मायास्वरूपम्

श्रीमद्भागवते मायायाः विभिन्नपर्यायशब्दाः प्राप्यन्ते – मायाविविधाविधान्युक्ता, यथा मोहिनी, योगमाया, इच्छा, दृष्टाशक्ति, अजा, विष्णुमाया, त्रिगुणात्मिका, अविशेषप्रधाना, अविद्यादिपर्यायैः अभिहितं महर्षिणा ।

[1] श्रीमद्भागवते ८/३/८

मायायाः कार्याणि दृष्ट्वा तत्स्वरूपं निर्धार्यते । इयं आदिपुरुषस्य शक्तिभूतास्ति । पञ्चमहाभूतैः जीवशरीरस्य रचना भवति । यथा–

एषा माया भगवतः सर्गस्थित्यन्तकारिणी ।
त्रिवर्णा वर्णितास्माभिः किं भूयः श्रोतुमिच्छसि ॥[1]

जगत्

जगद्विषये श्रीमद्भागवते अनेकेषु स्थलेषु सन्दर्भाः दृश्यन्ते । इदं जगत् परिदृश्यमानं त्रिगुणात्मिकं केवलं मनोजृम्भणं सारहीनं च वर्तते । यथा वेदान्ते रज्जौ अविद्याकारणं सर्पस्य तत्र मिथ्याभ्रमः वर्तते तथैव नामरूपात्मकं इदं जगत् मिथ्यास्ति । पारमार्थिकं सत्यं न व्यवहारिकं सत्यं दृश्यते ।

स्वजनसुतात्मदारधनधामधरासुरथैस्त्वयि
सति किं नृणां श्रयत आत्मनि सर्वरसे ।
इति सदजानतां मिथुनतो रतये चरतां
सुखयति को न्विह स्वविहते स्वनिरस्तभगे ॥[2]

जीवस्वरूपम्

श्रीमद्भागवते स्पष्टं परिलक्ष्यते यज्जीवः मायापाशबद्धः । अयं जीवः भगरहितः तथा भगवान् भगसम्पन्नः, मायावशेन अविद्योपाधिभूत्वा देहेन्द्रियैः कर्मणामुपभुज्यते । अयं जीवः इदं स्वरूपं यथार्थं संवेद्य आनन्दादिगुणरहितेन संसारदशां प्राप्नोति । किन्तु भगवान् मायां जहाति –

---

[1] श्रीमद्भागवते ११/३/१६

[2] श्रीमद्भागवते १०/८७/३४

स यदजया त्वजामनुशयीत गुणांश्च जुषन्
भजति सरूपतां तदनु मृत्युमपेतभगः ।
त्वमुत जहासि तामहिरिव त्वचमात्तभगो
महसि महीयसेऽष्टगुणितेऽपरिमेयभगः ॥[1]

जीवानामपि संख्या अपरिमिताः स्वातंत्र्येण सत्तां न स्वीकरोति । यथा जले कञ्चनादिक्रिया भवति जलस्थचन्द्रमसि चित्रणं च दृश्यते तथैव देहाभिमानी जीवः मिथ्याधर्मैः जगतः प्रतीतिः करोति न परमेश्वरस्य ।

मोक्षः

श्रीमद्भागवते मोक्षस्वरूपं प्राधान्येव वेदान्तसिद्धान्तदृष्ट्यैव वर्णितम् । तथापि भक्तिमार्गानुसारिभिः मुक्तेः साधनं भक्तिः एव गरीयसी इति निगदितः महर्षिणा । अयं सन्तप्तजीवः माया संतरणं कृत्वा मुक्तिं प्राप्नोति । श्रीमद्भागवते मुक्तिलाभाय न कोऽपि सुलभः मार्गः भक्तिं विना । भगवतः श्रीकृष्णस्य सकलानन्दस्वरूपं दृढा भक्तिरपेक्षिता अनेन सङ्गदोषोऽपि न जायते । यथा कपिलाचार्येण स्वमातरं देवहूतिं उपदिष्टम् । यस्य कस्यापि मनः भगवति वासुदेवे एकाग्ररूपेण रमति तदा भक्तिं प्राप्नोति । इयं भक्तिः सिद्धेरपि श्रेष्ठा वर्तते । भक्तिद्वारा भगवतः कृष्णस्य पादपद्मेषु रतिः विरतिः भगवतस्वरूपं च प्राप्नोति । अयमेव वैष्णवानां मोक्षः ।

-----------------

[1] श्रीमद्भागवते १०/८७/३८